# संस्कृतम्

## (209)

### शिक्षक-अंकितमूल्यांकनपत्रम् - I

### (पाठाः प्रथमतः दशमपर्यन्तम्)

पूर्णांकाः 25

**निर्देशाः**

(i) सर्वेप्रश्नाः अनिवार्याः। सर्वेषां प्रश्नानाम् अंकाः समानाः।

(ii) उत्तरपुस्तिकायां प्रथमपृष्ठे स्वनाम, अनुक्रमांकसंख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वं लेखनीयम्।

1. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं प चाशत् शब्देषु (50) लिखत–

(क) प्रेरणापाठात् प चदशक्रियापदानि चिनुत, तेषु प च क्रियापदानि वर्तमानकालिकानि, प च भूतकालिकानि प च च भविष्यत्कालानि स्युः। तानि क्रियापदानि वाक्येषु प्रयोजयत।

(ख) अधोलिखितसङ्केतपदानि आश्रित्य सदाचारिणः बालकस्यचरित्रं वर्णयत–

सदाचारवान् अभिवादनशीलः, गुरुशुश्रूषुः, धैर्यवान्, सत्यवादी, स्वस्थः, चरित्रवान्, सत्सङ्ग प्रियः, संयमी, परोपकारी। (सन्दर्भः– सदाचारः पाठः)

(ग) मकरः स्वधूर्ततां स्म त्वा पश्चात्तापं करोति। सः सन्मित्रस्य मित्रतायाः अपि व चितः जातः। तस्य पश्चात्तापं प चवाक्येषु वर्णयत।

2. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं प चाशत्शब्देषु (50) लिखत–

(क) यक्षस्य प च प्रश्नान्, युधिष्ठिरेण प्रदत्तानि तेषाम् उत्तराणि च लिखत। कश्च प्रश्नः भवद्भ्यः सर्वाधिकं रोचते किमर्थ च?

(ख) जगतः प चमूलभूततत्त्वानि सन्ति–प थ्वी, जलम् वायुः अग्निः, आकाशः च। आर्यभटेन एकैकमधिक त्य किं कथितम् इति लिखत।

(ग) 'मातुराज्ञा गरीयसी' इति पाठात् उत्तमपुरुषे प्रयुक्तानि क्रियापदानि एकवचने, द्विवचने, बहुवचने च विभज्य, पाठात् प्राप्तां शिक्षामधिक त्य तेषां वाक्यप्रयोग च कुरुत।

**अथवा**

अधोलिखितपदानामर्थं परिभाषां च लिखत

आत्मगतम्, प्रकाशम्, निष्क्रमणम्, प्रवेशः, ज्येष्ठः, कनिष्ठः, पुरस्क त्य।

3. कमपि एकं प्रश्नं दशवाक्येषु/ (200 शब्देषु) उत्तरत–

(क) आधुनिके युगे वयम् कान् कान् पशून्, खगान्, कीटान् च पश्यामः?

केषा चित् षण्णाम् उपयोगं जीवनशैलीम् च वर्णयत।

यथा अश्वः– सैनिकः अश्वम् आरुह्य युद्धाय गच्छति।

4. नदीनां जलस्य संरक्षणार्थं भवान् किं किं करिष्यति इति वर्णयत।

(क) भवान् एव प्राणः। भवतः सर्वाणि इन्द्रियाणि परस्परं कलहं कुर्वन्ति। संवादात्मकरूपेण एनां कथां वर्णयत।

(ख) धर्मस्य कमपि लक्षणद्वयम् अधिक त्य स्वजीवने तयोः पालनार्थं क तं श्रमं वर्णयत।

5. **परियोजनाकार्यम्**

प्रायः प्रत्येकं संस्था स्वप्रतीकचिह्नं स्वलक्ष्यवाक्यं च चिनोति यथा राष्ट्रीय मुक्त विद्यालयीशिक्षासंस्थानस्य लक्ष्यवाक्यम् अस्ति 'विद्याधनं सर्वधनप्रधानम्। एताद शानि दश लक्ष्यवाक्यानि चिनुत।

**अथवा**

समाचारपत्रेभ्यः प च व्यड्.ग्यचित्राणि संग ह्य प्रतिचित्रं प चवाक्येषु वर्णनं कुरुत।

# संस्कृतम्

## (209)

## शिक्षक-अंकितमूल्यांकनपत्रम् - II

## (पाठाः- एकादशतः विंशतिपर्यन्तम्)

पूर्णांकाः 25

**निर्देशाः**

(i) सर्वेप्रश्नाः अनिवार्याः। सर्वेषां प्रश्नानाम् अंकाः समानाः।

(ii) उत्तरपुस्तिकायां प्रथमपृष्ठे स्वनाम, अनुक्रमांकसंख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वं लेखनीयम्।

1. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं प चाशत् शब्देषु (50) लिखत–

(क) पुरुषार्थस्य महत्त्वं वर्णयित्वा कस्यचित् महापुरूषस्य जीवनात् उदाहरणं प्रस्तूयताम्।

(ख) 'अयोध्यां कुरु वैदेहि' इति पाठात् रामेण प्रदर्शितानि प च स्थानानि भारतस्य मानचित्रे प्रदर्शयत।

(ग) आर्यभटस्य भास्कराचार्येण सह तुलनां क त्वा प च वाक्यानि लिखत।

2. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं प चाशत् शब्देषु (50) लिखत–

(क) भोजसभायां प्रवेशार्थं कवेः चातुर्यं वर्णयित्वा स्वजीवनात् वाक्यचातुर्यस्य/कर्मचातुर्यस्य वा किमपि उदाहरणं प्रस्तूयताम्।

(ख) प्रहेलिकापाठात् प च विशेषणानि प च विशेष्याणि च चित्वा वाक्येषु प्रयोगं कुरुत।

(ग) कमपि एकं निमन्त्रणपत्रं चित्वा संस्क तभाषायाम् अनूद्य लिखत।

3. कस्यचिदेकस्य प्रश्नस्य उत्तरं दशवाक्येषु (100 शब्देषु) लिखत।

(क) 'करुणापरा हि साधवः' पाठात् प्राप्तां प्रेरणां वर्णयित्वा आधुनिकसमये मार्गेषु विहरतां कुक्कुराणां जीवनम् अधिक त्य सर्वकारेण क तान् प्रयत्नान् वर्णयत।

(ख) भवतः मित्रं विलम्बेन उत्तिष्ठति, स्नानमपि न करोति, दन्तमार्जनमपि न करोति। एतेषाम् उपयोगितां वर्णयन् तम् प्रति पत्रं लिखत।

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं दशवाक्येषु/ अधिकतमं 200 शब्देषु लिखत।

(क) अनागतं यः कुरुते सः शोभते इति पाठानुसारम् आत्मानं सिंहं मत्वा शृगाले गते सति स्वकीयां मनोदशां आत्मनः पश्चात्तापं च वर्णयत।

(ख) शारीरं वाड्.मयं मानसं च तपोभेदान् स्पष्टीकृत्य स्वजीवनात् एकस्य एकस्य तपसः उदाहरणं दीयताम्।

5. **परियोजनाकार्यम्**

भारते प्रसिद्धानां प च ऐतिहासिकस्थलानां/देवालयानां चित्राणां सङ्कलनं कृत्वा तेषाम् ऐतिहासिक् पृष्ठभूमिम् वर्णयत।

**अथवा**

स्वतन्त्रतासंघर्षे केषाचित् प च संस्कृतज्ञानां विदुषां विशेषयोगदानं सचित्रं वर्णयत।

# संस्क तम्

## (209)

## शिक्षक-अंकितमूल्यांकनपत्रम् - III

## (पाठाः एकविंशतितः द्वात्रिंशत् पर्यन्तम्)

पूर्णांकाः 25

**निर्देशाः**

(i) सर्वेप्रश्नाः अनिवार्याः। सर्वेषां प्रश्नानाम् अंकाः समानाः।

(ii) उत्तरपुस्तिकायां प्रथमपृष्ठे स्वनाम, अनुक्रमांकसंख्या, शिक्षणकेन्द्रस्य नाम, विषयस्य नाम इति सर्वं लेखनीयम्।

1. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं प चाशतशब्देषु (50) लिखत—

(क) भगवतः शङ्क्.राचार्यस्य जीवनात् भवान् कां प्रेरणां प्राप्नोति? स्वाध्ययनम्, लेखनं प्रचारकार्यम् इत्यादिषु किमपि एकं वैशिष्ट्यं स्वीकृत्य स्वनिश्चयः प्रस्तूयताम्।

(ख) अभिमानात् काः काः हानयः भवत इति स्वानुभवात् वर्णयत।

(ग) 'तेजसां हि न वयः समीक्ष्यते' इति पाठात् लवस्य विद्वत्तां शौर्य' निर्भयताम् च अधिकृत्य उदाहरणैः समर्थयत।

2. कयोश्चित् द्वयोः प्रश्नयोः उत्तरं प चाशतशब्देषु (50) लिखत—

(क) 'स्वस्ति पन्थामनुचरेम' इति पाठे वर्णितस्य समाजस्य आदर्शान् अधिकृत्य वर्तमानसमाजेन सह तुलनां कुरुत।

(ख) 'कथालेखनम्' इति पाठे प्रदत्तां कामपि कथां संवादात्मकरूपेण प्रस्तूयत।

(ग) स्वकीयग हस्य समीपे किमपि उद्यानं गत्वा तत्रस्थानां प चव क्षाणां गुणान् वर्णयतः 'पुत्रोऽहं प थिव्याः इति पाठात् च तुलनां कुरुत।

3. कमपि एकं प्रश्नं दशवाक्येषु (अधिकतम् 200 शब्देषु) उत्तरत—

(क) 'अजलं स्नानम्' इति पाठात् उद्धृतपदानां स्थाने पर्यायपदानि प्रयुज्य पाठस्थानि तत्वाक्यानि पुनः लिखत—

रजनीकरः, गभस्तयः, अनलः, चन्दनम्, अजलम्, वारि, राज्ञाम्, छात्रः, दुग्धं, गुरुः।

(ख) 'साहसे श्रीः प्रतिवसति' इति पाठात् दश अव्ययपदानि चित्वा एकम् भिन्नम् अनुच्छेदं/ कथां/ संवादं वा लिखत।

4. कमपि एकं प्रश्नं दशवाक्येषु (अधिकतमं 200 शब्देषु) लिखत।

(क) भारतस्य स्वातन्त्र्यसंघर्षे तिलकस्य योगदानं वर्णयित्वा भवान् देशस्य उन्नत्यै किं किं करिष्यतीति लिखत।

(ख) 'विरहकातरं तपोवनम्' इति पाठात् कण्वेन उक्तान् संवादान् उद्धृत्य तस्य चारित्रिकं वैशिष्ट्यं वर्णयत।

5. **परियोजनाकार्यम्**

'अद्भुतम् भारतम्' इति शीर्षकेण भारतस्य प्रमुखं वैशिष्ट्यम् अधिकृत्य सचित्रं वर्णन कुरुत।

**अथवा**

मादकवस्तुभिः/एड्सग्रस्तानां जनानाम् उपचारार्थं काः काः संस्थाः प्रयत्नशीलाः सन्ति इति तेषु प चानां नामानि, पत्रसङ्केतादीन्, दूरभाषसंख्यादीनि च संग ह्य प्रस्तूयनताम्।